योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ४५

पञ्चचत्वारिंशः सर्गः ४५

श्रीवसिष्ठ उवाच ।

अथापश्यदसौ गाधिः स्वाधिपीवरया धिया ।

अन्तर्जलस्थ एवान्तरात्मनात्मनि निर्मले ।। १

भूतमण्डलपर्यन्तग्रामोपान्तनिवासिनाम् ।

श्वपचानां स्त्रिया गर्भे स्थितिमात्मानमाकुलम् ।। २

गर्भवासभराक्रान्तं पीडितं पेलवाङ्गकम् ।

श्वपचीहृदये सुप्तं स्वविष्ठायामिवाकुलम् ।। ३

शनैः पक्वतया काले प्रसूतं मेचकच्छविम् ।

श्वपच्या प्रावृषेवाब्दं श्याममावलितं मलैः ।। ४

संपन्नं श्वपचागारे शिशुं श्वपचवल्लभम् ।

इतश्चेतश्च गच्छन्तमुत्पीडमिव यामुनम् ।। ५

द्वादशाब्ददशां यातं संस्थितं षोडशाब्दिकम् ।

पीवरांसमुदाराङ्गं पयोदमिव मेदुरम् ।। ६

सारमेयपरीवारं विहरन्तं वनाद्वनम् ।

निघ्नन्तं मृगलक्षाणि पौलिन्दीं स्थितिमागतम् ।। ७

तमाललतयेवाथ श्रितं श्वपचकान्तया ।

स्तनस्तबकशालिन्या नवपल्लवहस्तया ।। ८

श्यामया मलिनाकारदशनामलमालया ।

वनपल्लवया भूरिविलासवलिताङ्गया ।। ९

विलसन्तं वनान्तेषु तया सह नवेष्टया ।

श्यामलं श्यामया भृङ्गं भृंग्येव कुसुमर्द्धिषु ।। १०

वनपर्णलतापत्रे वसन्तं व्यसनातुरम् ।

विन्ध्यकान्तारमाकारमभ्यागतमिवोद्भटम् ।। ११

विश्रान्तं वनकुञ्जेषु सुप्तं गिरिदरीषु च ।

निलीनं पत्रपुञ्जेषु गुल्मकेषु कृतालयम् ।। १२

किंकिरातावतंसाढ्यं यूथिकास्त्रग्विभूषितम् ।

केतकोत्तंससुभगं सहकारस्रगाकुलम् ।। १३

लुलितं पुष्पशय्यासु भ्रान्तमद्रितटीषु च ।

तज्ज्ञं काननकोशेषु बहुज्ञं मृगमारणे ।। १४

प्रसूतमथ शैलेषु पुत्रान्निजकुलाङ्कुरान् ।

अत्यन्तविषमोदन्तान्खदिरः कण्टकानिव ।। १५

कलत्रवन्तं संपन्नं स्थितं प्रक्षीणयौवनम् ।

शनैर्जर्जरतां यातं वृष्टिहीनमिव स्थलम् ।। १६

ततो भूतग्रहग्रामजन्मदेशमुपेत्य तम् ।

संस्थितं मठिकां पर्णैः कृत्वा दूरे मुनीन्द्रवत् ।। १७

जराजरठतां यातं स्वदेहसमपुत्रकम् ।

जीर्णप्रायरसश्वभ्रतमालतरुसंनिभम् ।। १८

प्रौढं श्वपचगार्हस्थ्यं कुर्वाणं बहुबान्धवम् ।

क्रूरनामार्थवचनं परां वृद्धिमुपागतम् ।। १९

अथापश्यदसौ गाधिर्यावत्तस्य कलत्रिणः ।

जरठः श्वपचेभ्यश्च स्वात्मनो भ्रमहारिणः ।। २०

तत्कलत्रमशेषेण नीतमावृत्य मृत्युना ।

आसारसलिलेनाशु वनपर्णगणो यथा ।। २१

प्रलपत्येक एवासावटव्यां दुःखकर्शितः ।

वियूथ इव सारङ्गो विगतास्थोऽश्रुलोचनः ।। २२

दिनानि कतिचित्तत्र नीत्वा शोकपरीतधीः ।

जहौ स्वदेशं संशुष्कपद्मं सर इवाण्डजः ।। २३

विजहार बहून्देशाननास्थश्चिन्तयान्वितः ।

प्रेर्यमाण इवान्येन वातनुन्न इवाम्बुदः ।। २४

एकदा प्राप कीराणां मण्डले श्रीमतीं पुरीम् ।

खेचरो विहरन्शून्ये सद्विमानमिवाम्बरे ।। २५

नृत्यद्रत्नांशुकच्छन्नमार्गवृक्षलताङ्गनम् ।

आगुल्फाकीर्णकुसुमं चन्दनागुरुसुन्दरम् ।। २६

सामन्तैर्ललनाभिश्च नागरैश्च निरन्तरम् ।

स्वर्गमार्गोपमं राजमार्गमध्यमवाप सः ।। २७

मणिरत्नकृतागारं तत्र मङ्गलहस्तिनम् ।

ददर्शामरशैलेन्द्रमिव संचारचञ्चलम् ।। २८

मृते राजनि राजार्थं विहरन्तमितस्ततः ।

रत्नज्ञमिव रत्नार्थं चिन्तामणिदिदृक्षया ।। २९

तमसौ श्वपचो नागं कौतुकोद्धुरया दृशा ।

चिरमालोकयामास स्पन्दयुक्ताचलोपमम् ।। ३०

आलोकयन्तमादाय तं करेण स वारणः ।

स्वकटेऽयोजयन्मेरुस्तटेऽर्कमिव सादरम् ।। ३१

तस्मिन्कटगते नेदुर्जयदुन्दुभयोऽभितः ।

कल्पाम्बुद इवाकाशमधिरूढे महार्णवाः ।। ३२

पूरिताशो बभौ राजा जयतीति जनस्वनः ।

उदभूत्संप्रबुद्धानां विहगानामिवारवः ।। ३३

उदभूद्बन्दिवृन्दानां घनकोलाहलस्ततः ।

वेलाविलुलिताम्बूनामम्बुधीनामिव ध्वनिः ।। ३४

तं तत्रावरयामासुर्मण्डनार्थं वराङ्गनाः ।

क्षीरोदगतविभ्रान्ता लहर्य इव मन्दरम् ।। ३५

मानिन्यस्तं गुणप्रोतैर्नानारत्नैरपूरयन् ।

नानाप्रभाप्रभातार्का वेला इव तटाचलम् ।। ३६

तुषारशिशिरस्पर्शैस्तास्तं हारैरभूषयन् ।

श्यामा वननदीपूरैर्वर्षाः श्रृङ्गमिवोत्तमम् ।। २७

विचित्रवर्णसौगन्ध्यैः पुष्पैरावलयन्स्त्रियः ।

वनं मधुश्रिय इव तं लोलकरपल्लवाः ।। ३८

नानावर्णरसामोदैस्तास्तमाशु विलेपनैः ।

अलेपयन्प्रभाजालैर्नगोऽभ्रमिव धातुभिः ।। ३९

रत्नकाञ्चनकान्तोऽसावाददे चित्तमाततम् ।

संध्याभ्रतारेन्दुनदीव्याप्तं मेरुरिवाम्बरम् ।। ४०

भूषितः सविलासाभिर्बालवल्लीभिरावृतः ।

रत्नपुष्पांशुकाकीर्णः कल्पवृक्ष इवाबभौ ।। ४१

तादृशं तमुपाजग्मुः परिवारसमन्विताः ।

सर्वाः प्रकृतयः फुल्लं मार्गद्रुममिवाध्वगाः ।। ४२

ता एनमासने सैंहे तत्राभिषिषिचुः क्रमात् ।

तस्मिन्नेव गजे शक्रमैरावत इवामराः ।। ४३

एवं स श्वपचो राज्यं प्राप कीरपुरान्तरे ।

आरण्यं हरिणं पुष्टमप्राणमिव वायसः ।। ४४

कीरीकरतलाम्भोजप्रमृष्टचरणाम्बुजः ।

सर्वाङ्गे कुङ्कुमालेपैः संध्याम्बुधरशोभनः ।। ४५

जज्वाल कीरनगरे नागरीगणवानसौ ।

सिंहीगणयुतः सिंहो यथा कुसुमिते वने ।। ४६

हरिहतकरिकुम्भोन्मुक्तमुक्ताकलाप-

प्रविरचितशरीरः शान्तचिन्ताविषादः ।

अरमत सह सद्भिस्तत्र भोगैः सरस्यां

रविकरमदतप्तो वारिपूरैरिवेभः ।। ४७

परिविसृतनृपौजाः सर्वदिक्संस्थिताज्ञः

कतिपयदिवसेहासिद्धदेशव्यवस्थः ।

प्रकृतिभिरलमूढाशेषराजन्यभारः

स गवल इति नाम्ना तत्र राजा बभूव ।।४८

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मोक्षोपायेषूपशमप्रकरणे गाधिवृत्तान्ते श्वपचराज्यलाभो नाम

पञ्चचत्वारिंशः सर्गः ।।४५।।